नूतने च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्द्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुड़ौरपूर्णान् प्रकल्प्य संयुतेऽन्ततः ।
अथवा तन्मूलदेशे सचूतपल्लवास्तथा ॥
पीतवस्त्रेण संयुक्तं कुर्य्यादष्टचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भानाञ्च चतुःपार्श्वे यवतिलैर्युतान्तण्डुलान् ।
स्थापयेयुः क्रमात्तत्र पूजाकाले द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् ग्रहादींश्च समर्च्चयेत् ॥
हुत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोघृतेन क्षीरेण स्नापयित्वा यथाक्रमम् ॥
स्वेन स्वेनैव मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्करारिष्टदोषस्तु चतुर्थ्यान्तस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोड़शे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य सुतहानिं विनिर्द्दिशेत् ॥
अथवा स्वामिनं हन्ति द्वितीयं भ्रातरन्तथा ।
तृतीयं सर्व्वहानिः स्यात् सुतवित्तविनाशनम् ॥
प्रेतारिष्टविनाशाय यमादीन् यो न होमयेत् ।
सर्व्वाणि तस्य नश्यन्ति गोमहिष्यादीनि सर्व्वतः ॥
एवंविधिकृतं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अस्मिन् कृते न सन्देहः प्रेतारिष्टं न पीड़येत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
एतद्धोमं विनिर्द्दिष्टं यत्नतो न करोति यः ।
न रक्षति यमस्तस्य एभिर्मासैश्च वंशजम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा वापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापत्यमेव च ।
एकैकं वर्षसंपूर्णे कुटुम्बं पीड़येद्ध्रुवम् ॥
षोड़शे मासि संपूर्णे बान्धवान् परिपीड़येत् ॥
बान्धवानामभावे च वास्तुदष्टो न जीवति ॥
त्रिपुष्करे तथा दोषे यः प्रेतं न तु होमयेत् ।
देवता यदि वा रक्षेत् तस्य पुत्त्रो न जीवति ॥
यत्किञ्चिद्दानमुत्सृज्य शुद्धो भवति मानवः ।
न रक्षति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्करारिष्टशान्तये ।
यमं धर्म्मं चित्रगुप्तं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा हुत्वा शान्तिं दद्याद्बलिं बुधः ॥
प्रभाते च तथा रात्रावशौचान्तदिने तथा ।
आचार्य्यश्च प्रकुर्व्वीत अर्पयेच्च चरुं ततः ॥
त्रिप्रचत्रिययोर्दर्भैः पिष्टैर्वास्य निर्म्मितम् ।
मृदस्य गोमयेनापि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुघृताक्तञ्च चरुं पश्चाच्च दापयेत् ।
ततोऽरिष्टः प्रशान्तः स्यात्ततो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं वस्त्रयुग्मेन यत्नतः ।
आचार्य्यं दृश्ययात्तत्र पश्चाद्दृत्विजमेव च ॥"
इति वराहसंहितोक्तपुष्करशान्तिप्रमाणम् ॥

पुष्करकर्णिका, स्त्री, (पुष्करं पद्मं कर्णयति सादृश्येन प्राप्नोतीति । कर्ण + ण्वुल् । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाड़ी, स्त्री, (पुष्करं पद्मं नाड़यति सौन्दर्य्येण भ्रंशयतीति । नाड़ + अच् । ततो ङीष् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करजातं मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तस्य पर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराक्षयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करशिफा १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककासशोफपाण्डुनाशित्वञ्च । इति राजनिर्घण्टः ॥ "विशेषात् पार्श्वशूलनुत् ।" इति भावप्रकाशः ॥ (व्यवहारोऽस्य यथा,—
"भार्गीं पुष्करमूलञ्च रास्नां बिल्वं यमानिकाम् ।
नागरं दशमूलञ्च पिप्पलीश्चाप्सु साधयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्य्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठस्य मूलम् । इति त्रिकाण्डशेषः ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करशिफा, स्त्री, (पुष्करस्य शिफा जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करस्रजौ, पुं, (पुष्करस्य पद्मस्य स्रक् ययोरिति ।) अश्विनीकुमारौ । द्विवचनान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । २ । ३३ ।
"आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥"
"किम्भूतं कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनौ अश्विनीकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तत्तुल्यः कुमारः पुष्करस्रक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरञ्च पुत्त्रमधत्तेति सूचितम् ॥" इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, तिथ्यादितत्त्वे ।
"पुष्कराक्ष ! निमग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ॥"
(श्रीकृष्णः । यथा, महाभारते ।१।२२०।१६।
"अथाब्रवीत् पुष्कराक्षः प्रहसन्निव भारत ! ॥")

पुष्कराङ्कः, पुं, (पुष्करस्य आङ्का आङ्का यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २२ ॥ (पुष्करं आङ्का यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।
"तुम्बुरुपुष्कराङ्कहिङ्गुवचावेतसपथ्यालवणत्रयं यवक्काथेन पातुं प्रयच्छेत् ॥")

पुष्कराह्वयं, क्ली, (पुष्करं आह्वयो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—
"क्षुद्रान्वता नागरपुष्कराह्वये:
कृतः कषायः कफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी,स्त्री,(पुष्करवत् आकृतिरस्त्यस्या इति । पुष्कर + इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डादण्डमस्त्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यत्रेति ।) जलाशयः । इति मेदिनी । णे,१०४ ॥ शतधनुःपरिमितसमचतुरस्रजलाधारः । पुकुर इति पुखरि इति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः ।१।१०।२७॥ जलकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥*॥ सा तु दक्षिणोत्तरायता कार्य्या ।
यथा,—
"कूपवापीपुष्करिण्यो दीर्घिका द्रोण एव च ।
तड़ागः सरसी चैव सागरश्चाष्टमो मतः ॥
सर्व्वजलाशयः कार्य्यो यत्नाद्याम्योत्तरायतः ॥"
इति कल्पतरौ वायुपुराणम् ॥ * ॥
तस्या लक्षणं यथा । "पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् ।
'चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरश्चैव तावत् पुष्करिणी मता ।
एतत्पञ्चगुणः प्रोक्तस्तड़ाग इति निश्चयः ॥'
तेन चतुर्द्दिक्षु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनाभ्यन्तरत्वेन पुष्करिणी । एतज्जलाशयाधारपरं न तु उपरितटम् । शतेन धनुर्भिः पुष्करिणी । इति नव्यवर्द्धमानधृतो वशिष्ठः ॥*॥ तत्करणे वास्तुयागः कर्त्तव्यः । महाकपिलपञ्चरात्रम् ।
'जलाधारगृहार्थेषु यजेद्वास्तुं विशेषतः ।
ब्रह्मादादितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः ।
सर्व्वेषां किल वास्तूनां नायकाः परिकीर्त्तिताः ॥
असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत् ।
अनिष्पत्तिर्विनाशः स्यादुभयोर्धर्म्मधर्म्मिणोः ॥'
ब्रह्मादादितिपर्य्यन्ता इति कल्पान्तरम् । देवीपुराणोक्त ईशादिकल्प एव व्यवह्रियते । धर्म्मधर्म्मिणोस्तड़ागादितत्कर्त्रोः । आरम्भदिने तदकरणे उत्सर्गादिनेऽपि आदौ तत्करणम् ।
यथा,—
'प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् ।
वास्तुपूजामकुर्व्वाणस्तवाहारो भविष्यति ॥'
इति मत्स्यपुराणे पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचने प्रासादधर्म्मातिदेशाच्च वाप्यादिप्रतिष्ठादिनेऽपि वास्तुयागकरणम् ॥ * ॥